International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2015; 1(6): 01-04
© 2015 IJSR
www.sanskritjournal.com
Received: 01-07-2015
Accepted: 02-08-2015

**डा.प्रियव्रतमिश्रः**
सहायकाचार्यः,व्याकरणविभागे
श्रीरामसुन्दरसंस्कृतविश्वविद्याप्रतिष्ठानम्
(आदर्शसंस्कृतमहाविद्यालयः)
रमौली, पो- बहेडा, जि-दरभंगा-
८४७२०१(बिहारम्)

**Correspondence**
**डा.प्रियव्रतमिश्रः**
सहायकाचार्यः,व्याकरणविभागे
श्रीरामसुन्दरसंस्कृतविश्वविद्याप्रतिष्ठानम्
(आदर्शसंस्कृतमहाविद्यालयः)
रमौली, पो- बहेडा, जि-दरभंगा-
८४७२०१(बिहारम्)

# "सन्त्यप्रयुक्ताः" इति वचनं केवलं साहसमात्रमेव

**डा.प्रियव्रतमिश्रः**

शेषाशेषेऽस्मिन् महाभाष्ये शब्दविषयकप्रदर्शनाधिकरणे "अस्त्यप्रयुक्त" इति आक्षेपभाष्यं निराकुर्वन् भाष्यकृत् सप्तद्वीपा वसुमती.... इति विवृण्वन् "सन्त्यप्रयुक्ताः इति वचनं केवलं साहसमात्रमेव" इति जुघोष । साम्प्रतं तु केचन तादृक्षाः प्रयोगाः दृश्यन्ते ये च अदृष्टपूर्वा इति अवभासन्ते, तावता नायं शब्दः साधुत्वमेति वक्तुं शक्यम्, ते च शब्दाः प्रसङ्गविशेषे प्रकृत्यन्तरेण प्रत्ययान्तरेण वा साधुत्वं यान्ति । तदेतद् मनसि निधाय अत्र कश्चन प्रयासो विधीयते ।

**समानेऽप्यर्थे देशभेदेन शब्दभेद**

पुरा केचन शब्दाः समानार्थका आसन्, परञ्च कालान्तरे देशभेदेनैतेषां प्रयोगो नियतोऽभवत् । यथा- "शव्-हम्म्-रंह्-गम् इति समानार्थकाः सार्वदेशिकाश्च धातव उत्तरकाले देशभेदेन नियता अभवन् । तत्र कम्बोजीयाः शव्धातुमेव प्रयुञ्जते स्म सौराष्ट्राश्च हम्म्-धातुम् । प्राच्यमगधीया रंहधातुं प्रयुञ्जते स्म आर्यावर्त्तीयाश्च गम् धातुम् । तदुक्तं महाभाष्ये – "शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति । हम्मति सुराष्ट्रेषु रंहतिः प्राच्यमगधेषु, गमिमेव त्वार्याः प्रयुञ्जते इति । एवमेव बहवः तादृशाः शब्दाः दरीदृश्यन्ते ये च क्रमशः पूर्णपत्रे प्रकट्यन्ते ।

**कुञ्जिशब्दाः (keywords)** - महाभाष्यम्, वसुमती, सौराष्ट्रम्, कम्बोजम्, बृहदारण्यकोपनिषद्, पाणिनि, पतञ्जलिः, व्यासः, कर्णः, वैयाकरणः, भाषाविज्ञानम् इत्यादयः ।

## वाङ्मुखम्

शेषाशेषेऽस्मिन् महाभाष्ये शब्दविषयकप्रदर्शनाधिकरणे "अस्त्यप्रयुक्त" इति आक्षेपभाष्यं निराकुर्वन् भाष्यकृत् सप्तद्वीपा वसुमती.... इति विवृण्वन् "सन्त्यप्रयुक्ताः इति वचनं केवलं साहसमात्रमेव" इति जुघोष। साम्प्रतं तु केचन तादृक्षाः प्रयोगाः दृश्यन्ते ये च अदृष्टपूर्वा इति अवभासन्ते, तावता नायं शब्दः साधुत्वमेति वक्तुं शक्यम्, ते च शब्दाः प्रसङ्गविशेषे प्रकृत्यन्तरेण प्रत्ययान्तरेण वा साधुत्वं यान्ति । तदेतद् मनसि निधाय अत्र कश्चन प्रयासो विधीयते।
आदिमा संस्कृतभाषाऽतिविशालाऽऽसीत्, परञ्चोत्तरोत्तरमस्याः ह्रासः संक्षेपीकरणं वाऽभवत् । तत्र सार्वलौकिकाः केचन शब्दा उत्तरकाले नियतविषयत्वमापन्नाः । तदुक्तं महाभाष्ये – "एतस्मिन्नति महति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र नियतविषया दृश्यन्ते" १ इति ।देशजातिप्रस्थानकालादिभेदेन शब्दा नियतविषयत्वमापद्यन्ते । यथा –

### समानेऽप्यर्थे देशभेदेन शब्दभेदः

पुरा केचन शब्दाः समानार्थका आसन्, परञ्च कालान्तरे देशभेदेनैतेषां प्रयोगो नियतोऽभवत् । यथा- "शव्-हम्म्-रंह्-गम् इति समानार्थकाः सार्वदेशिकाश्च धातव उत्तरकाले देशभेदेन नियता अभवन् । तत्र कम्बोजीयाः शव्धातुमेव प्रयुञ्जते स्म सौराष्ट्राश्च हम्म्- धातुम् । प्राच्यमगधीया रंहधातुं प्रयुञ्जते स्म आर्यावर्त्तीयाश्च गम् धातुम् । तदुक्तं महाभाष्ये – "शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति । हम्मति सुराष्ट्रेषु रंहतिः प्राच्यमगधेषु,गमिमेव त्वार्याः प्रयुञ्जते२ इति ।
पुरा "आम्रगुप्तायनिः, आम्रगुप्तिः" इत्युभावेव प्रयोगौ समानार्थकौ सार्वदेशिकौ चास्ताम्,परञ्च कालान्तरे "आम्रगुप्तायनिः" इति शब्द उदीच्येष्वेव प्रयुक्तोऽभवत्, "आम्रगुप्तिः" इति च प्राच्यादिषु । अत्र "उदीचां वृद्धादगोत्रम्" ३ इति पाणिनिसूत्रं प्रमाणम् ।

### समानेऽप्यर्थे जातिभेदेन शब्दभेदः

पुरा केचन शब्दाः समानार्थकाः सार्वलौकिकाश्चासन्,परञ्च तेषां प्रयोगो जातिभेदेन नियतोऽभवत् । यथा- "हय्-अर्वन्-वाजिन्-अश्व" इति शब्दाः पुरा समानार्थकाः सार्वलौकिकाश्चासन्, परञ्च जातिभेदेन कालान्तरे नियता अभवन् ।

तत्र देवा हयशब्दमेव प्रयुञ्जते स्म असुराश्च अर्वञ्छब्दम् । गन्धर्वा वाजिशब्दं प्रयुञ्जते स्म मनुष्याश्चाश्वशब्दम् । तदुक्तं बृहदारण्यकोपनिषदि – "हयो भूत्वा देवानवहत्, वाजी गन्धर्वान्, अर्वा असुरान्, अश्वो मनुष्यान् ४" इति ।

प्राचीनकाले भवशर्वौ सार्वलौकिकौ समानार्थकौ चास्ताम्, परञ्चोत्तरकाले भवशब्द: केवलं बाहीकेषु प्रयुक्तोऽभवत्, शर्वशब्दश्च प्राच्येषु । तदुक्तं शतपथे – "भव इति यथा बाहीका:, शर्व इति यथा प्राच्या:" ५ इति । पुरा अर्धनेमशब्दौ सार्वलौकिकौ समानार्थकौ चास्ताम्, परञ्च कालान्तरे अर्धशब्द आर्येषु प्रयुक्तोऽभवत्, नेमशब्दश्च म्लेच्छेषु ६ ।

**समानेऽप्यर्थे प्रस्थानभेदेन शब्दभेद:**

प्रस्थानशब्दश्चतुर्दशानामष्टादशानां व विद्यास्थानानां वाचक: । प्रस्थानभेदेनापि शब्दभेदो जायते । यथा – पृतन्यतपृतनायतशब्दौ मूर्च्छामूर्च्छायशब्दौ च समानार्थकौ । तत्र ऋग्वेदे पृतन्यतशब्द: प्रयुज्यते७ यजुषि च पृतनायतशब्द: ८ । चरके मूर्च्छायशब्द: प्रयुज्यते ९ ततोऽन्यत्र च मूर्च्छाशब्द: १०।

**कालभेदेन शब्दानां लोप:**

पूर्वं प्रयुज्यमाना अपि केचन शब्दा: कालभेदाल्लुप्यते । अत्र प्रमाणं काशकृत्स्नव्याकरणं, कात्यायनवार्त्तिकम्, भाष्यवचनं च । काशकृत्स्नप्रवचनकाले लोकविश्रुता: केचन धातव: पाणिनिकाले छान्दसा अभवन् । पाणिनिकाले ये धातवश्छान्दसा अभवन्, पाणिनिस्तेषां पाठात् पूर्वं "छन्दसि" इत्यधिकारसूत्रं पठति, काशकृत्स्नस्तु छन्दोऽधिकारं विनैव तान् पठति । यथा-छन्दसि (गणसूत्रम्, १९७) इत्यधिकारसूत्रं पठित्वा पाणिनि: "अह-दध-चमू-रि-क्षि-चिरि" इत्यादिस्वादिगणीयधातून् पठति, काशकृत्स्नेन तु छन्दोधिकारं विनैवैते धातव: पठिता: ११। अनेन पाठेन काशकृत्स्नकाले अहादिधातूनां सार्वलौकिकत्वं सिद्ध्यति पाणिनिकाले च छान्दसत्वं लोके प्रयोगानर्हत्वं च ।

लोहितादिडाज्भ्य: क्यष् (३-१-१३) इति सूत्रे वार्त्तिककार: कात्यायनो लोहितडाज्भ्य: क्यष्वचनं भृशादिष्वितराणि इति वचनं पठति । लोहितादिगणे "लोहित-नील-हरित-पीत-मद्र-फेन-मन्द" इति शब्दा: समायान्ति । "लोहितादिडाज्भ्य:" इति सूत्रं लोहितादिगणपठितशब्देभ्य: क्यष्प्रत्ययं निर्दिशति वा क्यष: इति सूत्रेण च क्यष्प्रत्ययान्ता विकल्पेनात्मनेपदिनो भवन्ति । अत एव पाणिनिमतेन प्रत्येकं लोहितादिगणपठित: शब्दो द्विविधरूपं भजते – आत्मनेपदं परस्मैपदं च ।

वार्त्तिककार: कात्यायनस्तु लोहितशब्दादेव क्यष्प्रत्ययमिच्छति, न तु लोहितगणपठितशब्देभ्य: । अत एव स नीलहरितादिशब्दान् भृशादिगणे पठति, तेभ्यश्च भृशादिभ्यो भुव्व्वेर्लोपश्च हल: इति सूत्रेण क्यङ्प्रत्ययं निर्दिशति, येन तन्मतेन क्यङ्प्रत्ययान्ता नीलादिशब्दा नित्यमेव आत्मनेपदिनो भवन्ति क्यष्प्रत्ययान्ताश्च लोहितशब्दो विकल्पेन ।

तदेवं पाणिनिकाले लोहितादिगणस्था: सर्व एव शब्दा उभयपदिन आसन्, परञ्च कात्यायनसमये लोहितशब्देन स्वीयमुभयपदित्वं रक्षितमन्यैश्च तत्परित्यक्तम् । पाणिनिकाले "प्रियाष्टानौ,प्रियाष्टान:" १२ की:" १३ इत्यादिप्रयोगा लोकव्यवहारे प्रयुक्ता आसन् । अत एव पाणिनिना तेषामन्वाख्यानं प्रदर्शितम्, परञ्च पतञ्जलिकाल एते प्रयोगा भाषायामप्रयुक्ता अभवन् । अत एव पतञ्जलिर्भाषायामप्रयुक्तशब्दानां संस्काराय "यथालक्षणमप्रयुक्ते" इति वचनं पठति कैयटश्च प्रदीपे तन्मतं समर्थयते । तदुक्तं प्रदीपे –"यस्य प्रयोगो नोपलभ्यते तल्लक्षणानुसारेण संस्कर्त्तव्यम् १४ इति । तदेवं कालभेदेन केचन शब्दा लुप्ता अपि भवन्तीति निसर्गसिद्धम् ।

**प्रकृतिविकृतीनां नियतविषयता**

क्वचिद् देशभेदादपि प्रकृतिविकृतिरूपशब्दा नियतप्रयोगविषया भवन्ति । यथा- पुरा कस्मिंश्चिद् देशे आख्यातरूपप्रकृतेरेव प्रयोगो भवति स्म कस्मिंश्चिच्च देशे कृदन्तरूपविकृते: । तत्र "शवति इत्याख्यातपदं कम्बोजेष्वेव प्रयुक्तमभवत् तद्विकृतिरूपं "शव:" इति कृदन्तपदमार्येषु । "दाति" इति क्रियापदं प्राच्येषु प्रयुक्तमभवत् तत्कृदन्तरूपं "दात्रम्" इति पदं चोदीच्येषु । तदुक्तं निरुक्ते –"अथापि प्रकृतय एव एकेषु भाष्यन्ते, विकृतय एकेषु । शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते । विकारमस्य आर्येषु भाषन्ते शव इति । दातिर्लवनार्थे प्राच्येषु,दात्रमुदीच्येषु १५ इति ।

तदेवं देशादिभेदेन भाषा नियतविषयत्वमापद्यते, परिवर्त्तते विलुप्यते चेति भाषावैज्ञानिकं सत्यम् । लुप्तशब्दराशेरन्वेषणं वैयाकरणानां कर्त्तव्यम् । तदुक्तं महाभाष्ये –" सर्वे खल्वप्येते शब्दा देशान्तरे प्रयुज्यन्ते, न चोपलभ्यन्ते उपलब्धौ यत्न: क्रियताम् १६ इति । भट्टकुमारिलोऽपि विनष्टशब्दराशेरन्वेषणाय वैयाकरणान् प्रेरयति । अत एवोक्तं तेन तन्त्रवार्त्तिके –" यावांश्चाकृतको विनष्ट: शब्दराशिस्तस्य व्याकरणमेवैकमुपलक्षणम्, तदुपलक्षितरूपाणि च १७ इति।

**प्रकृत्यन्तरस्य स्वरूपम्**

आदेशागमादिभि: प्रत्यययोगेन च निष्पन्ना प्रकृति: प्रकृत्यन्तरम्। प्रकृतिरियं पाणिनिना स्वरगणपाठे नैव पठिता। अत एवेयं प्रकृति: प्रकृत्यन्तरशब्देनोच्यते । नागेशोऽप्यन्यप्रकृतिकं शब्दं प्रकृत्यन्तरशब्देन निर्दिशति । तदुक्तमुद्योते – "सापत्न: प्रकृत्यन्तरत्वादिति । अन्या प्रकृतिर्यस्य स प्रकृत्यन्तरस्तत्त्वादित्यर्थ: १८ इति ।

यास्कपाणिन्यादिमुनीनां कालं यावदनेकेषां कृत्तद्धितादिप्रयोगाणां प्रकृतिर्लुप्ताभवत् प्रकृतिलोपाच्च तदर्थोऽपि लुप्त: । अतो वैयाकरणैर्लुप्तप्रकृतेस्तदर्थस्य च बोधाय प्रकृत्यन्तरं कल्पितम् । लाघवेन लुप्तप्रकृतिकशब्दानामन्वाख्यानाय तैर्भाषावैज्ञानिको मार्गोऽनुसृत: । अस्यां पद्धतौ नष्टाश्वदग्धरथन्यायेन १९ व्याक्रियमाणशब्दस्य लुप्तप्रकृते: सम्बन्धस्तादृशेन शब्देन सह संयुज्यते, यो लुप्तप्रकृते: समानार्थक:, सदृशतमो लोके च लब्धप्रचारो भवेत् । अस्या एव लोकविदितप्रकृते: प्रत्यया विधीयन्ते । तत्र क्वचित् प्रत्ययानाश्रित्य आदेशागमादिभि: प्रकृत्यन्तरं साध्यते क्वचिच्च प्रकृत्या सह स्वार्थिकप्रत्यययोगेन समासान्तप्रत्यययोगेन च ।

तदेवमादेशागमादिभि: प्रत्यययोगेन च निष्पन्नस्य प्रकृतिस्वरूपस्य मूलप्रकृतिरूपेण स्वीकरणं प्रकृत्यन्तरम् । अनया रीत्या ज्ञातप्रकृते: साहाय्येन अज्ञातप्रकृतेस्तदर्थस्य च बोध: सुगमो भवति । यथा –

१) कानीनो व्यास: कर्णश्च इत्यत्र प्रयुक्तस्य "कानीन" इति शब्दस्य मूलप्रकृति: "कनीना" इति वर्त्तते । प्रकृतिरियं पूर्वकाले प्रयुक्ता आसीत्, परञ्च कालान्तरे लुप्ताभवत् । अत: पाणिनिना कन्याया: कनीन च इति सूत्रे कनीना शब्दस्य सम्बन्धस्तत्समानार्थकेन, सदृशतमेन लोकविश्रुतेन च कन्याशब्देन सह योजितस्तस्मादेव च कन्याशब्दादपत्यार्थेऽण्प्रत्यय: प्रकृतेश्च कनीनादेशो विहित: । अनेन स्थान्यादेशरूपलघुप्रयासेन कानीनशब्दस्य प्रकृतेस्तदर्थस्य च बोध: सुगमो जात: ।

२) मानुष:, मनुष्य: इति शब्दयोर्मूलप्रकृति: "मनुष्" इति वर्त्तते । प्रकृतिरियं पूर्वकाले प्रयुक्ताऽऽसीत्, परञ्च कालान्तरे लुप्ताभवत् । अत: पाणिनिना मनोर्जातावञ्यतौ षुक् च इति सूत्रे "मनुष्" इति शब्दस्य सम्बन्धस्तत्समानार्थकेन, सदृशतमेन लोकविश्रुतेन च "मनु" इति शब्देन सह योजितस्तस्मादेव च मनुशब्दादपत्यरूपजातावञ्यत्प्रत्ययौ प्रकृतेश्च षुगागमो विहित: । अनेनागमरूपलघुप्रयासेन मानुषमनुष्यशब्दयो: प्रकृतेस्तदर्थस्य च बोध: सुगमो भवति ।

३) अवेर्मांसम् इत्यर्थे "आविकम्" इति रूपं निष्पद्यते । अत्र प्रयुक्तस्य "आविकम्" इति शब्दस्य मूलप्रकृति: "आविक" इति वर्त्तते । पुरा प्रयुक्तापीयं प्रकृति: कालान्तरे लुप्ताभवत् । अत: पाणिनिना "अवे: क:" इति सूत्रे "आविक" इति शब्दस्य सम्बन्धस्तत्समानार्थकेन, सदृशतमेन लोकविश्रुतेन च "अवि" इति शब्देन सह योजितस्तस्मादेव च "अवि" इति शब्दात् स्वार्थे कप्रत्ययं विधाय

"अविक" इति शब्दो निष्पादितस्तस्माच्च विकारार्थेऽण्प्रत्ययं कृत्वा "आविकम्" इति शब्दो निष्पादित: । तदेवमत्र प्रकृत्या सह कप्रत्यययोगेन आविकशब्दस्य प्रकृतेस्तदर्थस्य च बोधो जायते ।

४) राजाय प्रयतेमहि,महाराज: इत्यत्र अकारान्तो राजशब्द: प्रयुक्तो वर्त्तते । पुरा प्रयुक्तोऽप्ययमकारान्तो राजशब्द: कालान्तरे प्रकृतिरूपेण लुप्तोऽभवत् । अत: पाणिनिना राजाहस्सखिभ्यष्टच्" इति सूत्रेऽकारान्तराजशब्दस्य सम्बन्धस्तत्समानार्थकेन, सदृशतमेन लोकविश्रुतेन च नकारान्तेन राजन्-शब्देन सह योजितस्तस्मादेव च समासान्तटच्प्रत्ययं विधाय तद्योगेन अकारान्तो राजशब्दो निष्पादित: । अत्र प्रकृत्या सह टच्प्रत्यययोगेन राजप्रकृतेस्तदर्थस्य च बोधो जायते ।

५) प्रसन्नोदं सर:, लोहितोद:, नीलोद: इत्यत्र प्रयुक्त: "उद" इति शब्दो मूलप्रकृतिरूप: । पूर्वकालेऽयम् "उद" इति शब्द: प्रकृतिरूपेण प्रयुक्तोऽप्युत्तरकाले प्रकृतिरूपेण लुप्तो जात: । अतो वैयाकरणै: संज्ञायामुत्तरपदस्य उदकशब्दस्य उदादेशो भवतीति वक्तव्यम् (वा.पा.६-३-५७)इति वार्त्तिके उदशब्दस्य सम्बन्धस्तत्समानार्थकेन सदृशतमेन लोकविश्रुतेन च "उदक" इति शब्देन सह योजित:,अस्यैव च "उदक" इति शब्दस्य स्थाने उदादेशं कृत्वा तस्य प्रकृत्यन्तरत्वं दर्शितम्। अनया रीत्या उदप्रकृतेस्तदर्थस्य च बोध: सुगमो भवति ।

**भाषावैज्ञानिकव्याख्यानस्वरूपं प्रकृत्यन्तरसाधनं च –**

प्रकृत्यन्तरसाधनाय सूत्राणां भाषावैज्ञानिकं व्याख्यानमावश्यकम् । अस्मिन् व्याख्याने प्रथमं प्रकृत्यन्तरसाधनं भवति तदनन्तरं च प्रत्ययविशेषेण समासविशेषेण च तत्संयोजनम् । व्याख्यानमिदं प्रकृत्यन्तरस्य स्वतन्त्रप्रकृतित्वं दर्शयति । तत्र प्रकृत्यन्तरं सार्वकालिकं भवति प्रत्ययविशेषे समासविशेषे च तत्प्रयोगस्तु नियतकालिक: पाणिनिकालिको वा । प्रकृत्यन्तरमिदं प्रकृते: स्थान आदेशागमादिभि: प्रकृत्या च सह स्वार्थिकप्रत्ययस्य समासान्तप्रत्ययस्य च योजनेन साध्यते । अत्र प्रमाणत्वेन कानिचिदुदाहरणानि प्रस्तूयन्ते ।

१) कन्याया: कनीन च (४-१-११६)-

"कन्यास्थानीय: कनीनादेश: प्रकृत्यन्तरं तस्माच्चापत्यार्थेऽण्प्रत्ययो भवति" इति सूत्रस्य भाषावैज्ञानिकं व्याख्यानम् । पुरा "कनीन" इति प्रकृति: स्वतन्त्ररूपेण प्रयुक्तापि पाणिनिकालेऽस्या: प्रयोग: प्रायेणापत्यार्थेऽणि समभवदिति सूत्रस्य स्वारसिकोऽर्थ: ।

२) राजाहसखिभ्यष्टच् (५-४-९१) "राजन्-आदिशब्दै: सह टच्प्रत्यययोगेन निष्पन्ना अकारान्ता राज-आदय: शब्दा: प्रकृत्यन्तराणि एतेषां च प्रयोगस्तत्पुरुष उत्तरपदरूपेण भवति" इति सूत्रस्य भाषावैज्ञानिकं व्याख्यानम् । पुरा अकारान्ता राजादिप्रकृतय: स्वतन्त्ररूपेण प्रयुक्ता अपि कालान्तरे आसां प्रयोगस्तत्पुरुषसमास उत्तरपदरूपेण नियतोऽभवदिति सूत्रस्य स्वारसिकोऽर्थ: ।

**३)उदकस्योद: संज्ञायाम्(६-३-५७)-**

"उदकस्थानीय उदादेश: प्रकृत्यन्तरं तत्प्रयोगश्च संज्ञायामुत्तरपदे परतो भवति" इति सूत्रस्य भाषावैज्ञानिकं व्याख्यानम् । पुरा "उद" इति प्रकृति: स्वतन्त्ररूपेण प्रयुक्तापि कालान्तरेऽस्या: प्रयोग: संज्ञायामुत्तरपदे परतो नियतोऽभवदिति सूत्रस्य स्वारसिकोऽर्थ: ।

**४) चुरादिभ्यो णिच् (३-१-२५)-**

"चुरादिगणपठितधातुभि: सह स्वार्थिकणिच्प्रत्यययोगेन निष्पन्नानि "चोरि" इत्यादिशब्दस्वरूपाणि प्रकृत्यन्तराणि" इति सूत्रस्य भाषावैज्ञानिकं व्याख्यानम् । पुरा चुरादिगणीयधातवो णिजन्ता अणिजन्ताश्चोभयविधरूपेण प्रयुक्ता आसन् । कालान्तरे एतेषां णिजन्तरूपं प्रकृतिरूपेण विनष्टं तत्प्रयोगोऽपि च नियतो जात इति सूत्रस्य तात्पर्यम् । अत एवात्र तद्रूपं स्वार्थिकणिच्प्रत्ययविधानेन दर्शितम् ।

**प्रकृत्यन्तरसाधने व्याख्यानदोषाणां समाधानम् –**

भाषावैज्ञानिकमिदं व्याख्यानं प्रकृत्यन्तरं साधयति प्रकृत्यन्तरसाधनेन च सूत्राणां व्याख्यानजन्यदोषाणां समाधानं करोति । यथा –

१) कन्याया: कनीन च इति सूत्रमपत्यार्थेऽण्प्रत्ययं तत्सन्नियोगेन च कन्याया: कनीनादेशं निर्दिशति । परम्पराप्राप्तमिदं व्याख्यानमपत्यार्थेऽण्येव "कनीन" इति प्रकृते: प्रयोगं दर्शयति तदपि च स्त्रीलिङ्गे,येन "वृषभ: कनीन:" २०, "भिनत् कनीन" २१, कनीनकेव विद्रधे" २२ इत्यार्षवाङ्मयस्य प्रयोगेषु "कनीन" इति प्रकृते: प्रयोगो न सम्भवति । "कनीन:" इत्यत्रापत्यार्थकाण्प्रत्ययस्य स्त्रीलिङ्गस्य चोभयोरेवाभावो विद्यते "कनीनका" इत्यत्र च केवलमपत्यार्थकाण्प्रत्ययस्याभाव: । अत एव "कन्याया: कनीन च" इति सूत्रस्य प्रकृत्यन्तरसाधकं भाषावैज्ञानिकमिदं व्याख्यानं क्रियते – "कन्यास्थानीय: कनीनादेश: प्रकृत्यन्तरम्" इति । अस्मिन् व्याख्याने पूर्वं प्रकृत्यन्तरसाधनं भवति तदनन्तरं च तस्माद् विवक्षितप्रत्ययविधानम्, येन कनीनादेशस्य स्वतन्त्रप्रकृतित्वं सिद्ध्यति तत्प्रयोगश्चापत्यार्थकाण्प्रत्ययाभावे स्त्रीलिङ्गाभावेऽपि च सम्भवति ।

२) राजाहसखिभ्यष्टच् इति सूत्रं राजन्-आदिशब्दान्तात् तत्पुरुषात् समासान्तं टच्प्रत्ययं निर्दिशति । व्याख्यानमिदं परम्पराप्राप्तम् । व्याख्यानमिदं राजन्-आदिशब्दान्ते तत्पुरुषे टच्प्रत्ययस्यानिवार्यतां बहुव्रीहौ समासाभावे च तदभावं निर्दिशति,येन राजाय प्रयतेमहि २३ इत्यत्र समासाभावेऽकारान्तराजशब्दस्य त्र्यहोऽश्वमेध: २४ इत्यत्र बहुव्रीहौ चाकारान्ताहशब्दस्य प्रयोगो न सम्भवति । एवमेव नागराज्ञ: २५ सर्वराज्ञाम् २६ इत्यत्र तत्पुरुषसमास उत्तरपदे नकारान्तराजन्शब्दस्य प्रयोगो न सम्भवति, तत्पुरुषे समासान्तटच्प्रत्ययविधानस्यावश्यकत्वात् ।

अत एव राजाहसखिभ्यष्टच् इति सूत्रस्य प्रकृत्यन्तरसाधकं भाषावैज्ञानिकमिदं व्याख्यानं क्रियते- "राजन्-आदिशब्दै: सह टच्प्रत्यययोगेन निष्पन्ना अकारान्ता राजादय: शब्दा: प्रकृत्यन्तराणि" इति । अस्मिन् व्याख्याने पूर्वं प्रकृत्यन्तरसाधनं भवति तदनन्तरं च तेन सह समासविधानम्, येनाकारान्तराजादिशब्दानां स्वतन्त्रप्रकृतित्वं सिद्ध्यति तेषां च प्रयोगस्तत्पुरुषसमासे, समासान्तरे समासाभावे चापि सम्भवति । "राजन्, राज" इति समानार्थिका द्विविधा प्रकृतिरित्यङ्गीकारे क्वचित्तत्पुरुषेऽपि नकारान्तराजन्प्रकृते: प्रयोग: सम्भवति । पाणिनिकाले प्रायेण तत्पुरुषसमासेऽकारान्तराजशब्द: प्रयुज्यते स्मेति सूत्रस्य स्वारसिकोऽर्थ: ।

३.उदकस्योद: संज्ञायाम् इति सूत्रं संज्ञायामुत्तरपदे परत उदकस्योदभावं निर्दिशति । परम्पराप्राप्तमिदं व्याख्यानमुत्तरपदस्थे संज्ञाऽभावे च उदकस्योदाभावं दर्शयति,येन "प्रसन्नोदं सर:" २७ इत्यत्रोदकस्योदभावो न सम्भवति । अत्रोदकस्थानीय-उदादेश उत्तरपदस्थ: संज्ञायाश्च बोधक: ।

अत एव उदकस्योद: संज्ञायाम् इति सूत्रस्य प्रकृत्यन्तरसाधकं भाषावैज्ञानिकमिदं व्याख्यानं क्रियते- "उदकस्थानीय उदादेश: प्रकृत्यन्तरम्" इति । अस्मिन् व्याख्याने पूर्वं प्रकृत्यन्तरसाधनं भवति तदनन्तरं चार्थविशेषे तस्य पूर्वपदेनोत्तरपदेन वा समासविधानम् । येन "उद"इति शब्दस्य स्वतन्त्रप्रकृतित्वं गम्यते । अत एव "प्रसन्नोदं सर:" इत्यत्रासंज्ञायामुत्तरपदस्थत्वेऽपि "उद" इति प्रकृते: प्रयोग: सम्भवति ।

४.चुरादिभ्यो णिच् इति सूत्रं चुरादिगणपठितधातुभ्य: स्वार्थे णिच्प्रत्ययं निर्दिशति । परम्पराप्राप्तेनानेन व्याख्यानेन चुरादिगणपठितधातुभ्य: स्वार्थिकणिच्प्रत्ययविधानस्यावश्यकत्वं गम्यते, परञ्च चोरति, चोरत:, चोरन्ति २८ इत्यत्र नायं स्वार्थिकणिच्प्रत्ययो दृश्यते ।

अत एव चुरादिभ्यो णिच् इति सूत्रस्य प्रकृत्यन्तरसाधकं भाषावैज्ञानिकमिदं व्याख्यानं क्रियते- "चुरादिगणपठितधातुभि: सह स्वार्थिकणिच्प्रत्यययोजनेन निष्पन्ना: "चोरि" इत्यादिधातव: प्रकृत्यन्तराणि" इति । व्याख्यानमिदं "चोरि" इति प्रकृतिं "चुर्" इति प्रकृतेर्भिन्नत्वेन दर्शयति । इयमेव भिन्नता "चोरयति

चोरति” इति प्रयोगयो: स्वरूपभिन्नताया: कारणम् । “चोरयति” इत्यत्र “चोरि” इति प्रकृते: प्रयोगो विद्यते “चोरति” इत्यत्र च “चुर्” इति प्रकृते: प्रयोग: ।

५.प्रकृत्यन्तरविषयकमिदं भाषावैज्ञानिकं व्याख्यानं नास्मत्कल्पनाप्रसूतमपितु यास्कपतञ्जलिप्रभृतिभि: प्रमाणभूतैराचार्यैर्यत्र तत्र स्वीकृतमपि वर्त्तते । यथा –

अ) सुधातुरकङ् च इति सूत्रे सुधातृव्यासवरुडनिषादचण्डालबिम्बिनामिति वक्तव्यम् इति वार्त्तिकं पठितमस्ति । भाष्यकारस्तु अकङादेशेन निष्पन्नान् सुधातकादिशब्दान् स्वतन्त्राणि प्रातिपदिकानि मत्वा आह – “तत्तर्हि वक्तव्यम् । न वक्तव्यम् । प्रकृत्यन्तराण्येवैतानि” २९ इति ।

आ)पतञ्जलि: स्वार्थिकप्रत्यययोगेन निष्पन्नं पीतकशब्दं प्रकृत्यन्तरं मत्वाऽऽह – “पीतकशब्दो वा प्रकृत्यन्तरम्” ३० इति ।

इ) काशिका हृदादेशरूपं हृच्छब्दं प्रकृत्यन्तरं मन्यते । अत एवोक्तं तत्र – “हृच्छब्द: प्रकृत्यन्तरम्” ३१ इति।

ई) क्षीरस्वामी कस्यचिन्मतेन धमादेशं प्रकृत्यन्तररूपेण दर्शयति । अत एवोक्तं तत्र- “धमि: प्रकृत्यन्तरमित्येके” ३२ इति।

उ) यास्क: षुगागमेन निष्पन्नं “मनुष्” इति प्रातिपदिकं स्वतन्त्रं प्रातिपदिकं मत्वाऽऽह – “मनुष्य: कस्मात् ? मनोरपत्यं मनुषो वा ३३ इति ।

आदेशागमादिविधायकसूत्राणां व्याख्यानजन्यदोषाणामपकरणायात्र निदर्शनरूपेण प्रकृत्यन्तरसाधनं दर्शितम् । एवं क्रमेण तादृक्षा अनेके प्रयोगा: पुरा प्रयुक्ता अपि साम्प्रतं न नयनगोचरा: भवन्ति । एवञ्च स्थितस्य गतिश्चिन्तनीयेति न्यायेन कश्चन प्रयासो विहित: । तत्र पातञ्जलजलतिमिङ्गिला एव प्रमाणम् । प्रयोगवैरल्यात् “सन्त्यप्रयुक्ता इति वचनं तु साहसमात्रम्” इत्यलं पल्लवितेन ।

**सन्दर्भा:**


१.म.पस्पशा.पृ ३८

२४. वा.रा. १-१४-४०

२. म.पस्पशा.पृ ३८

२५.महा.आदि.१६.१३

३. पा.अ. ४-१-१५७

२६.महा.आदि.१-१०२

४. बृ.आ.उ.१-१-१

२७. म.उ.६-३-५७

५. श.ब्रा. १-७-३८

२८. क्षीर.१०.३२५

६. द्र.मी.शा.भा.१-३-१०

२९. म.४-१-९७

७. ऋ.सं. १.८.४,८.८६.५,१०.४३.६

३०.म.४-२-२

८. यजु:,१२.९९,१३.२६

३१. काशि.६-३-५१

९. च.सं,सूत्रस्थानम् २४.३५,३७,३८

३२. क्षीर.१-६.५९

१०. रघु.७-४४ प्रहारमूर्च्छापगमे रथस्था

३३.निरु.३-२

११. का.धा.व्या. ४१.७

१२. म. १.१.२४

१३. म. ६-१-६८

१४.म.प्र.२-४-३४

१५. निरु.२.२

१६. म.१-१-१

१७. तं.वा.शा.भा.प्र.भा(पू.सं) १-३-१२,पृ२३९

१८. म.उ.६-३-३५

१९. द्र.म.१.१.५०- तवाश्वो नष्ट:,ममापि रथो दग्ध:,उभौ संप्रयुज्यावहै ।

२०.ऋ.सं.३-४८-१

२१. ऋ.सं. ८-६९-१४

२२. ऋ.सं. ४-३२-२३

२३. महा.आदि.९४-४४